(ख) नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-

रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः ।

शङ्कास्पृष्टा इव जलमुचस्त्वादृशा जालमार्गै-

र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥

(ग) तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं

दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।

तस्योपान्ते कृतकतनयः कान्तया वर्धितो मे

हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥

**8×2=16**



**Roll No. .......................** **Exam Code : M-21**

# Subject Code—52796

## M. A. EXAMINATION

(Batch 2017-2019) (Re-appear/Main)

(Third Semester)

SANSKRIT

Paper XV

Aitihasikakavyam Khandakavyam Cha

*Time : 3 Hours* *Maximum Marks :* 80

**नोट** : सभी प्रश्नों के उत्तर दीजिए ।

**1.** अधोलिखितानां प्रश्नानां संक्षिप्तोत्तराणि प्रदेयानि –

(क) विधातुः चुलुकात् जातः वीरः कथं आसीत् ?

(ख) विल्हणस्य कृतीनां परिचयो देयः ।

(ग) भामिनीविलासस्य सारः लेखनीयः ।

(घ) कालिदासस्य खण्डकाव्ययोः परिचयो देयः ।

**4×4=16**

2. छन्दोऽलङ्कारनिर्देशपूर्वकं सप्रसङ्गं श्लोक**द्वयं** व्याख्यायताम् –

(क) अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः ।
वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम् ।।

(ख) न दुर्जनानामिह कोऽपि दोषस्तेषां स्वभावो हि गुणासहिष्णुः ।
द्वेष्यैव केषामपि चन्द्रखण्डविपाण्डुरा पुण्ड्रकशर्करापि ।।

(ग) ज्ञात्वा विधातुश्चुलुकात् प्रसूतिं तेजस्विनोऽन्यस्य समस्तजेतुः ।
प्राणेश्वरः पङ्कजिनीवधूनां पूर्वाचलं दुर्गमिवारुरोह ।।

**8×2=16**

3. छन्दोऽलङ्कारनिर्देशपूर्वकं सप्रसङ्गं श्लोक**द्वयं** व्याख्यायताम् –

(क) दृप्तारिदेहे समरोपमर्दसूत्रावशेषस्थितहारदाम्नि ।
यज्ञोपवीतभ्रमतो बभूव यस्य प्रहर्तुः क्षणमन्तरायः ।।

(ख) राशीकृतं विश्वमिवावलोक्य वेलावने तस्य चमूसमूहम् ।
अम्भोविभूतेऽपरिक्षयेणक्षारत्वमब्धिर्बहु मन्यते स्म ।।

(ग) यात्रासु यस्य ध्वजिनीभरेण दोलायमाना सकला धरित्री ।
आर्द्रव्रणाधिष्ठितपृष्ठपीठमकर्मठं कूर्मपतिं चकार ।।

**8×2=16**



4. भावार्थपूर्वकं श्लोक**द्वयं** सप्रसङ्गं व्याख्येयं –

(क) नितरां नीचोऽस्मीति खेदं कूप मा कदापि कृथाः ।
अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीतासि ।।

(ख) तोयैरल्पैरपि करुणयाभीममानौ निदाघे
मालाकार व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां
धारासारान् अपि विकिरता विश्वतो वारिदेन ।।

(ग) वहति विषधरान्पटीरजन्मा शिरसि मषीपटलं दधाति दीपः ।
विधुरपि भजतेतरां कलङ्कं पिशुनजनं च विभर्ति यत्क्षितीन्द्रः ।।

**8×2=16**

5. संस्कृतमाध्यमेन सप्रसङ्गं श्लोक**द्वयं** व्याख्यायताम् –

(क) आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तैर्-
नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यस्मात्प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वितेशानां न च खलु वयो यौवनादन्यदस्ति ।।